घण, द न उ दीप्तौ। इति कविकल्पद्रुमः॥ (तना०-उभं-अकं-सेट्। उदित्वात् क्त्वावेट्।) द न, घणोति घणुते। उ, घणित्वा घत्वा। इति दुर्गादासः॥

घण्टः, पुं, (घण्+क्तः।) स्वनामख्यातव्यञ्जनविशेषः। मत्स्यघण्टगुणाः। बलरुचिकारित्वम्। वातनाशित्वञ्च। इति राजवल्लभः॥

घण्टकः, पुं, (घण्ट+संज्ञायां कन्।) क्षुपविशेषः। घेँटकोल इति भाषा। अस्य मूलगुणाः। कफनाशित्वम्। कटुपाकित्वम्। पित्तकारित्वञ्च। इति राजवल्लभः॥ घण्टकर्णोऽपि पाठः॥

घण्टा, स्त्री, (घण्टयति दीप्यते पूजादिकाले वादनेन शोभते, घण्टयति शब्दायते वा। घटि दीप्तौ+अच् ततष्टाप्।) कांस्यनिर्म्मितवाद्यविशेषः। यथा, स्मृतिः।
"सर्व्ववाद्यमयी घण्टा वाद्याभावे नियोजयेत्॥"
"शङ्खो यस्य गृहे नास्ति घण्टा वा गरुड़ान्विता। पुरतो वासुदेवस्य न स भागवतः कलौ॥"
इति पद्मपुराणे पातालखण्डम्॥
अथ घण्टामाहात्म्यमुक्तञ्च स्कान्दे श्रीब्रह्मनारदसंवादे यथा,—
"स्नानार्च्चनक्रियाकाले घण्टानादं करोति यः। पुरतो वासुदेवस्य तस्य पुण्यफलं शृणु॥
वर्षकोटिसहस्राणि वर्षकोटिशतानि च। वसते देवलोके तु अप्सरोगणसेवितः॥
सर्व्ववाद्यमयी घण्टा केशवस्य सदा प्रिया। वादनाल्लभते पुण्यं यज्ञकोटिसमुद्भवम्॥
वादित्रनिनदैस्तूर्य्यगीतमङ्गलनिःस्वनैः। यः स्नापयति गोविन्दं जीवन्मुक्तो भवेद्धि सः॥
वादित्राणामभावे तु पूजाकाले हि सर्व्वदा। घण्टाशब्दो नरैः कार्य्यः सर्व्ववाद्यमयी यतः॥
सर्व्ववाद्यमयी घण्टा देवदेवस्य वल्लभा। तस्मात् सर्व्वप्रयत्नेन घण्टानादन्तु कारयेत्॥
मन्वन्तरसहस्राणि मन्वन्तरशतानि च। घण्टानादेन देवेशः प्रीतो भवति केशवः॥"*॥
तथा, विष्णुधर्म्मोत्तरे श्रीभगवत्प्रह्लादसंवादे।
"शृणु दैत्येन्द्र! वक्ष्यामि घण्टामाहात्म्यमुत्तमम्। प्रह्लाद! त्वत्समो नास्ति मद्भक्तो भुवनत्रये॥
मम नामाङ्किता घण्टा पुरतो मम तिष्ठति। अर्च्चिता वैष्णवगृहे तत्र मां विद्धि दैत्यज!॥
वैनतेयाङ्कितां घण्टां सुदर्शनयुतां यदि। ममाग्रे स्थापयेद्यस्तु देहे तस्य वसाम्यहम्॥
यस्तु वादयते घण्टां वैनतेयेन चिह्निताम्। धूपे नीराजने स्नाने पूजाकाले विलेपने॥
मामाग्रे प्रत्यहं वत्स! प्रत्येकं लभते फलम्। मखायुतं गोयुतञ्च चान्द्रायणशतोद्भवम्॥
विफला चाकृता पूजा सफला जायते सुताम्। घण्टानादेन तुष्टोऽहं प्रयच्छामि स्वकं पदम्॥
नागारिचिह्निता घण्टा रथाङ्गेन समन्विता। वादनात् कुरुते नाशं जन्मान्तकभयस्य च॥
गरुड़ेनाङ्कितां घण्टां दृष्ट्वाहं प्रत्यहं सदा। प्रीतिं करोमि दैत्येन्द्र! लक्ष्मीं प्राप्य यथाधनः॥
दृष्ट्वान्तं यथा देवाः प्रीतिं कुर्व्वन्त्यहर्निशम्। सुपर्णे च तथा प्रीतिं घण्टाशिखरमास्थिते॥
स्वकरेण प्रकुर्व्वन्ति घण्टानादं सुभक्तितः। मदीयार्च्चनकाले तु फलं कोट्यैन्दवं कलौ॥"
अन्यत्र च।
"घण्टादण्डस्य शिखरे सचक्रं स्थापयेत्तु यः। गरुड़ं वै प्रियं विष्णोः स्थापितं भुवनत्रयम्॥
सचक्रघण्टानादन्तु मृत्युकाले शृणोति यः। पापकोटियुतस्यापि नश्यन्ति यमकिङ्कराः॥
सर्व्वे दोषाः प्रलीयन्ते घण्टानादे कृते हरौ। देवतानां मुनीन्द्राणां पितॄणामुत्सवो भवेत्॥
अभावे वैनतेयस्य चक्रस्यापि न संशयः। घण्टानादेन भक्तानां प्रसादं कुरुते हरिः॥
गृहे यस्य भवेन्नित्यं घण्टा नागारिसंयुता। न सर्पाणां तत्र भयं नाग्निविद्युत्समुद्भवम्॥
यस्य घण्टा गृहे नास्ति शङ्खश्च पुरतो हरेः। कथं भागवतं नाम गीयते तस्य देहिनः॥"
"अतो भगवतः प्रीत्यै घण्टा श्रीगरुड़ान्विता। संग्राह्या वैष्णवैर्यत्नाच्चक्रेणोपरि मण्डिता॥
मौनं वृत्तं पुराणादिपठनञ्च प्रशस्यते॥"
इति श्रीहरिभक्तिविलासे ६ विलासः॥
(घण्टयति दीप्यते कुसुमादिभिरिति। घटि+अच्। स्त्रियां टाप्।) घण्टापाटलिवृक्षः। इति शब्दरत्नावली॥ अतिबला। नागबला। इति राजनिर्घण्टः॥ (अतिबलानागबलाघण्टापाटलिशब्देष्वासां विवृतिर्यथायथं ज्ञातव्या॥)

घण्टाकः, पुं, (घण्टयति दीप्यते स्वकुसुमैरिति। घटि+अच् टाप्। घण्टा तया घण्टेति आख्ययेत्यर्थः कायतीति। घण्टा+कै+कः।) घण्टापाटलिवृक्षः। इति शब्दरत्नावली॥

घण्टाकर्णः, पुं, (घण्टावत् कर्णो यस्य।) शिवगणविशेषः। घेँटु इति ख्यातः। यथा,—
"घण्टाकर्णो गणः श्रीमान् शिवस्यातीववल्लभः॥"
इति शिवपुराणम्॥
तस्य पूजाविधिर्यथा,—
"चैत्रे मासि च संपूज्यो घण्टाकर्णो घटात्मकः। आरोग्यार्थं स्नुहीमूले संक्रान्त्यां तत्र कारयेत्॥"
पूजामन्त्रो यथा,—
"घण्टाकर्ण! महावीर! सर्व्वव्याधिविनाशन!! विस्फोटकभये प्राप्ते रक्ष रक्ष महाबल!॥"
इति तिथ्यादितत्त्वे रविसंक्रान्तिप्रकरणम्॥
(व॰।धौम्यह्रदविशेषः। यथा, काशीखण्डे। ३३।१७५।
"इयं हि चित्रघण्टेशी घण्टाकर्णस्त्वयं ह्रदः॥")

घण्टापथः, पुं, (घण्टानां उपलक्षणात् घण्टादिवादित्राणां पन्थाः। "ऋक्पूरब्धूःपथामानक्षे।" ५।४।७४। इति अः।) घण्टोपलक्षितानां हस्त्यादीनां पन्थाः। इति भरतः॥ ग्रामादौ प्रधानमार्गः। यथा,—
"दशधन्वन्तरो राजमार्गो घण्टापथः स्मृतः॥"
इति चाणक्यम्।
तत्पर्य्यायः। संसरणम् २। तत् संसरणं यदि पुरसम्बन्धि स्यात्तदा उपनिष्करमिति ख्यातम्। इत्यमरः।२।१।१८॥

घण्टापाटलिः, पुं, (घण्टा चासौ पाटलिश्चेति कर्म्मधारयः।) वृक्षविशेषः। घण्टापारुल इति भाषा॥ तत्पर्य्यायः। गोलीढः २ झाटलः ३ मोचः ४ मुष्ककः ५। इत्यमरः।२।४।३६॥ गोलिहः ६ घण्टा ७ पाटलिः ८। इति तट्टीका॥ क्षारद्रुः ९ कालमुष्ककः १०। इति रत्नमाला॥ पाटली ११ घण्टाकः १२ झाटः १३। इति शब्दरत्नावली॥ तीक्ष्णः १४ घण्टकः १५। इति रत्नकोषः॥ मोक्षकः १६ काष्ठपाटली १७ कालाश्याली १८ काचस्थली १८। इति भावप्रकाशः॥ राजनिर्घण्टोक्तगुणपर्य्यायौ मुष्ककशब्दे द्रष्टव्यौ॥

घण्टाबीजं, क्ली, (घण्टेव बीजमस्य।) जयपालः। इति राजनिर्घण्टः॥

घण्टारवा, स्त्री, (घण्टारववत् रवः पक्वफलेषु यस्याः। यद्वा, पक्वेषु फलेषु घण्टेव रौतीति। रु ल ध्वनौ+अच्।) वृक्षविशेषः। झनझनिया इति वनशण इति च भाषा॥ तत्पर्य्यायः। शणपुष्पिका २। इत्यमरः।२।४।१०७॥ शणपुष्पी ३। इति भरतः॥

घण्टाली, स्त्री, (घण्टां अलति पर्य्याप्नोति शब्देनेत्यर्थः। अल पर्य्याप्तौ+"कर्म्मण्यण्।" ३।२।१। इत्यण् स्त्रियां ङीप् च। यद्वा घण्टा आली सहचरी यस्याः शब्दसादृश्यात् तथात्वम्।) कोशातकी। इति राजनिर्घण्टः॥ झिङ्गा इति भाषा॥ (घण्टानां आली श्रेणी।) घण्टाश्रेणी च॥

घण्टाशब्दं, क्ली, (घण्टायाः शब्द इव शब्दो यस्य।) कांस्यम्। इति हेमचन्द्रः।४।११५॥

घण्टिका, स्त्री, (घण्टा+अल्पार्थे कन् ततष्टापि अत इत्वञ्च। घण्टिका क्षुद्रघण्टा तद्वत् आकृतिरस्त्यस्याः। अर्श आदित्वादच्।) लम्बिका। तालुहृत्सम्बजिह्वा। इति राजनिर्घण्टो हेमचन्द्रश्च॥ (गलरोगविशेषः। अस्य सलक्षणचिकित्सितं यथा,—
"तिलपिच्छिलगौल्यादिसेवनादतिद्रवादपि। नवोदकेन कफतो जायते घण्टिकागदः॥
जिह्वामूले कण्ठसन्धौ श्लेष्मरक्तसमुद्भवा। तेनास्यशोषो जड़ता स्वरो मन्दश्च जायते॥
शिरोव्यथा रुचिस्तन्द्रा तथास्यजड़ता भवेत्। तर्ज्जन्या कण्ठमध्ये तु संपीड्य रक्तग्रन्थिका॥
परिस्रुतं तथा रक्तं सदा विस्रावणं हितम्। वचाञ्च मरिचं कृष्णाचूर्णं तत्र निधापयेत्॥
मर्द्दनं स्यात् कण्ठदेशे तेन ग्रन्थिर्विलीयते। धान्यनागरजीमूतवचान्यग्रोधशुङ्गकाः॥
क्वाथः खेदो घण्टिकाया मुखे गण्डूषधारणम्। गले च घण्टिकामार्गे रक्तश्लेष्मविकारजा॥"
इति घण्टिकारोगः॥
इति हारीते चिकित्सितस्थाने पञ्चचत्वारिंशत्तमेऽध्याये॥)